CC-0. Digitized by eGangotri and MIDF- Delhi

॥ अथ दुर्गासप्तशती प्रारंभः ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीगोमायनमः श्रीसरस्वत्यैनमः श्रीनागयज्ञायनमः श्री

वासुदेवायनमः श्रीरामचन्द्रायनमः श्रीसनकपचायनमः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ स[illegible] विषयानुक्रमः ॥

विषयः	पत्रं
१ मङ्गलम्	१
२ पाठक्रमः	२
३ संकल्पः	३
४ गणपतिस्मरणपूजने ...	३
५ गुरुनमस्कारः	४
६ आसनविधिः	४
७ भूशुद्धिः	३५
८ भूतशुद्धिः	३७
९ प्राणप्रतिष्ठा ...	३८
१० मातृकान्यासः ...	४४
११ दीपप्रतिष्ठा ...	४५
१२ यंत्रपूजा	४६
१३ देवीयंत्रम्	४७
१४ पूजाविधिः	४९

विषयः	पत्रं
[illegible]	५७
[illegible] ...	५०
[illegible]लिः ...	०
[illegible] पूजनम्	३
[illegible]	४
[illegible] ...	१
[illegible]	३५
[illegible]	३७
[illegible]	३८
[illegible] ...	४४
[illegible] ...	४५
[illegible]कवैदिकं	४६
[illegible]क्तंतंत्रोक्तं	४७
[illegible]	४९

विषयः	पत्रं
२९ चक्रन्यासादि	५०
३० सप्तशती—	५४
१ प्रथमचरितम्	५४
२ मध्यमचरितम्	६६
३ उत्तमचरितम्	९०
३१ उत्तरन्यासादि	१४८
३२ देवीसूक्तवैदिकं	१४९
३३ देवीसूक्ततंत्रोक्तं	१५०
३४ जपनिवेदम्	१५४
३५ प्राधानिकरहस्यं	१५५
३६ वैकृतिकरहस्यं	१५९
३७ मूर्तिरहस्यं	१६५
३८ अपराधक्षमापनम्	१६८

[illegible]प्रियोगौ [illegible]क्रमश्च पृथक्पत्रेषु सन्ति.

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ दुर्गासप्तशतीप्रारम्भः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattaraj Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ श्रीदक्षिणामूर्तये नमः ॥ अथ कवचस्थदेवताकाम्यप्रयोगाः शतचंडीविधिर्मंत्रविभागकारिकाश्च संगृह्यंते ॥ ॥ तत्राग्रषट्के श्लोकानां न्यूनाधिकभावो बहुषु पुस्तकेषूपलभ्यते तन्निराकरणार्थं वचनानि लिख्यंते ॥ तत्र कवचांशे श्लोका दुर्गाप्रदीपे कवच-टीकायाम् । आधिक्यन्यूनतादोषपरिहारचिकीर्षया ॥ देवीनाम्नां क्रमस्यापि कथनं क्रियते मया ॥ ते च श्लोकाः प्राचीनग्रंथस्थाः सांप्रदायिका एव लिख्यंते । दशदिक्पालदेवाश्च चामुंडा च ततः परम् ॥ जया च विजया चैवाप्यजिता चापराजिता ॥ १ ॥ उद्योतिनी ततश्चोमा मालाधारी यशस्विनी ॥ त्रिनेत्रा यम-घंटा च शंखिनी द्वारवासिनी ॥ २ ॥ कालिका शांकरी पश्चा-त्सुगंधा चर्चिका तथा ॥ अमृतादिकला पश्चात्ततः स्यात्तु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सरस्वती ॥ ३ ॥ कौमारी चंडिका चित्रघंटा मायामहांदेका ॥
कामाक्ष्यनंतरं सर्वमंगला भद्रकालिका ॥ ४ ॥ धनुर्धरी नील-
ग्रीवा ततः स्यान्नलकूबरी ॥ खड्गधारिणिका पूर्वं वज्रधारिण्य-
नंतरम् ॥ ५ ॥ दंडिनी चांबिका शूलेशानी स्यात्तु नलेश्वरी ॥
मनःशोकविनाशा स्याल्ललिता शूलधारिणी ॥ ६ ॥ कामिनी
गुह्यपूर्वा स्यादीश्वरी च ततःपरा ॥ भूतनाथा ततः स्यात्तु महा-
महिषवाहिनी ॥ ७ ॥ भगवत्यपि विंध्यस्था महापूर्वा बला
तथा ॥ विनायकी नारसिंही ततः पश्चान्मितौजसी ॥ ८ ॥
श्रीवर्धते च पातालवासिन्यन्ते करालिनी ॥ उर्ध्वकेशी च कौबेरी
वागीशा पार्वती तथा ॥ ९ ॥ कालरात्रिश्च मुकुटेशानी पद्मावती
तथा ॥ चूडामणिस्तथा ज्वाला मुख्यभेद्या ततःस्मृता ॥ १० ॥ ब्रह्मा-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

णी छत्रपूर्वा स्यादीश्वरी धर्मचारिणी ॥ चक्रिणीन्द्रवधूश्चंडी महा-
लक्ष्मीश्च भैरवी ॥११॥ क्षेमं पूर्वाकरी पश्चाद्विजया च जयंतिका ॥
इत्येताः सम्यगाख्याताः कवचस्थाश्च शक्तयः—इति ॥ १२ ॥
कवचश्लोकसंख्या यथा—कवचेऽस्मिन् सार्धपंचाशत्संख्याश्लोक-
संग्रहः—इति वाराहीतंत्रे । अर्गलाश्लोकसंख्योक्ता तत्रैव—
त्रयोविंशतिसंख्यानां श्लोकानां मन्त्रसंग्रहः—इति । श्लोकाश्चतु-
र्दशैवात्र कीलके संप्रतिष्ठिताः—इत्यपि तत्रैव ॥ प्राधानिकरहस्य-
संख्या यथा—सार्धत्रिंशत्समाख्याताः श्लोकास्त्वत्र सुसंस्कृताः
इति ॥ वैकृतिकरहस्यश्लोकसंख्या यथा—श्लोकानां चैकोनचत्वा-
रिंशत्संख्याः प्रकीर्तिताः—इति ॥ मूर्तिरहस्यसंख्या यथा—पंचविं-
शति संख्यास्तु श्लोका अत्र प्रकीर्तिताः ॥ इति ॥ एवमुक्तप्रकारेण

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

या संख्या उक्तास्ता दुर्गाप्रदीपे द्रष्टव्याः। एतदतिरिक्ताः श्लोकाः प्रक्षिप्ता एवेति बोध्यम्॥ अत्र केचित्–सप्तशतीपाठारंभे शापोद्धारादिकमिच्छंति तत्प्रकारस्तु तंत्रेषूक्तः। स यथा–त्रयोदशप्रथमौ द्वादशद्वितीयौ एकादशतृतीयौ दशमचतुर्थौ नवमपंचमावष्टमषष्ठावध्यायौ पठित्वा सप्तममध्यायं द्विःपठेदिति शापोद्धारप्रकारः॥ उत्कीलनं यथा–आदौ मध्यमचरित्रं पठित्वा ततः प्रथमचरित्रं ततस्तृतीयचरित्रं पठेदिति॥ तदुक्तम्–अंत्याद्याकीद्धरुद्रदिग्ब्ध्यंकेष्विभर्तवः अश्वोश्व इति सर्वाणां शापोद्धारो मनोः क्रमः–इति। उत्कीलने चरित्राणां मध्याद्यंत्यामिति क्रम इत्याहुः। अंको नवम इषुः पंचमः इभोष्टमः अयं शापोद्धारक्रम उत्कीलनक्रमश्च यद्यप्युपलभ्यते तथापि विप्रतिपद्यंते बहवः। अत्र मूलं चिंत्य-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मिति तु नागोजीभट्टाः ॥ वस्तुतस्तु एकेन वामध्यमेन नैकेनेत-
रयोरिहेति रहस्याध्याकवचनेन यस्यैकपाठावसरो नास्ति, तस्य
मध्यमचरित्रपाठाभ्यनुज्ञानात्तादृशस्य पुरुषस्य पूर्वोक्तशापो-
द्धारोत्कालेनानुष्ठानस्यासंभवादभ्यनुज्ञानं व्यर्थमेव स्यात्तस्मा-
च्छापोद्धारादिकं नावश्यकमिति प्रतिभातीति। यद्यप्येवं तथापि
कीलकस्तोत्रोक्तकृष्णायामिति श्लोकोक्तरीत्या प्रतिमासंदानप्र-
तिग्रहाख्यकीलनं त्ववश्यं कर्तव्यमेव ॥ तदुक्तम् कृष्णायां वा
चतुर्दश्यामष्टम्यां वा समाहितः ॥ ददाति प्रतिगृह्णाति नान्यथैषा
प्रसीदतीति ॥ अस्यार्थः—कृष्णचतुर्दश्यां कृष्णाष्टम्यां वा समाहित
एकाग्रः सन्नुपासको निजं सर्वं धनं न्यायेनार्जितं देव्यै ददाति
समर्पयति हे देवि इत आरभ्येदं सर्वं धनं मदीयं तुभ्यं मया दत्त-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महालक्ष्मीमहासरस्वतीस्वरूपिणीत्रिगुणात्मिका-
महालक्ष्मीप्रीत्यर्थं कवचार्गलाकीलकैकादशन्यास-
पूर्वकनवार्णमंत्राष्टोत्तरशतजपरात्रिसूक्तपाठपूर्वकं
देवीसूक्तपठननवार्णमंत्राष्टोत्तरशतजपरहस्यत्रयप-
ठनांतं श्रीचंडीसप्तशत्याः पाठमहं करिष्ये ॥ तदंग-
त्वेनादौ संक्षेपत आसनविधिभूशुद्धिभूतशुद्ध्यादि
कर्म दीपस्थापनपूजने सप्तशतीपुस्तकपूजनं
रहस्योक्तयंत्रस्थप्रधानदेवतापूजनं वा तंत्रोक्त-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नवार्णयंत्रस्थप्रधानदेवतापूजनं पूजांगबलिदानं सकलशापप्रतिरोधिनिवृत्तये शापोद्धारमंत्रस्य सप्तसंख्याकजपं पाठादौ पाठांते चैकविंशतिसंख्याकतंत्रोक्तोत्कीलनमंत्रजपं च करिष्ये ॥ आदौ निर्विघ्नतासिद्ध्यर्थं महागणपतिस्मरणं पूजनं वा करिष्ये ॥ गणा० स्मरणे पूजने वा विनियोगः ॐ गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमं । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शृण्वन्नूतिभिः सीद सादनं इति ॥ तथा गुरुं च ।
नमो गुरुभ्यो गुरुपादुकाभ्यो नमः परेभ्यः परपादु-
काभ्यः । आचार्यसिद्धेश्वरपादुकाभ्यो नमोस्तु
लक्ष्मीपतिपादुकाभ्यः ॥ इति गणपतिं गुरुं च
प्रणमेत् ॥ आसनविधिः ॥ कल्पितासनाधो जला-
दिना त्रिकोणं विलिख्य ॐ ह्रीं आधारशक्ति-
कमलासनाय नम इत्याधारशक्तिं संपूज्य तदुपर्यनु-
द्विग्नताकरमजिनोर्णाद्यासनमास्तीर्य पृथ्वीति मंत्र-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्य मेरुपृष्ठ ऋषिः कूर्मो देवता सुतलं छंदः आसने विनियोगः ॐ पृथ्वि त्वयेति मंत्रेण आधारशक्तिं संप्रार्थ्य ॐ भूर्भुवः स्वरित्यासनं संप्रोक्ष्य तस्मिन्नासने प्राङ्मुख उदङ्मुखो वोपविशेत् । ततः स्ववामे गुरुभ्यो नमः दक्षिणे भद्रकाल्यै नमः उपरि गणपतये नमः इति द्वारदेवताः संपूज्य मूलं पठन् दिव्यदृष्ट्यवलोकनेन दिव्यान् विघ्नानुत्सार्य ॐ फडिति मंत्रेण प्रोक्षणेनांतरिक्षस्थान् विघ्नानुत्सार्य

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तेनैव मंत्रेण भूमौ वामपादपार्ष्णिघातेन भौमान्
विघ्नानुत्सार्य अस्त्राय फडिति तालत्रयेण दिग्बंधनं
कृत्वा ॐ नमः सुदर्शनायास्त्राय फडिति मंत्रेण
छोटिकया वह्निप्राकारत्रयं विभाव्य मूलेनाचम्य
प्राणायामं कुर्यात् ॥ अथ भूशुद्धिः ॥ सा यथा--
ॐ ह्रमिति बीजेन कुंडलिनीमुत्थाप्य हृदयस्थं
दीपकलिकाकारं जीवं ॐ हं सः इति मंत्रेण ब्रह्मणि
संयोज्य वामकुक्षिस्थितं पापपुरुषमसद्वासना-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्मकं ध्यात्वा यमिति वायुबीजेन ३२ द्वात्रिंश-
द्वारमावर्तितेन संशोष्य रमित्यग्निबीजेन ६४
चतुःषष्टिवारमावर्तितेन तं दग्ध्वा भूयो य-
मिति वायुबीजेन १६ षोडशमात्रया तद्भस्म
रेचयित्वा वमित्यमृतबीजेन प्राणायामं
कुर्यात् । इति भूशुद्धिः ॥ अथ भूतशुद्धिः ॥
इडया वायुमापूर्य कुंभके हं यं रं लं वं इति पंच
भूतबीजानि सकृदावर्त्य पिंगलया रेचयेत् ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ततो वमित्यमृतबीजेन प्राणायामं कृत्वा सद्या-
सनात्मकं देवीशरीरमुत्पाद्य सोहं इति मंत्रेण
कुंडलिनीं ब्रह्मणोवहत्य तत्रस्थं जीवं हृदि
निधाय कुंडलिनीं मूलाधारगतां विभावयेत् ॥
अथ प्राणप्रतिष्ठा ॥ आं ह्रीं क्रौं मम प्राणा इह
प्राणाः । आं ह्रीं क्रौं मम जीव इह स्थितः । आं
ह्रीं क्रौं मम सर्वेंद्रियाणीह स्थितानि । आं ह्रीं क्रौं
मम वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणप्राणाः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इहागत्य सुखं चिरं तिष्ठंतु स्वाहा । ॐ असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगं । ज्योक्पश्येम सूर्यमुच्चरंतमनुमते मृळयानः स्वाति ॥ गर्भाधानादिपंचदशसंस्कारसिद्ध्यर्थं पंचदशप्रणवावृत्तीः करिष्ये इति ॐकारं १५ वारं जपेत् । रक्तांभोधिस्थपोतोल्लसदरुणस-रोजाधिरूढाकराब्जैः पाशं कोदंडमिक्षूद्भवमथ गुणमप्यंकुशं पंचबाणान् । बिभ्राणासृक्कपालं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रिनयनलसिता पीनवक्षोरुहाढया देवी बाला-
र्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥
सुप्रतिष्ठितमस्तु । इति प्राणप्रतिष्ठा ॥ अथ
मातृकान्यासः । स यथा- ॐ अं नमः ललाटे ।
आं नमः मुखवृत्ते । इं नमः दक्षनेत्रे । ईं नमः
वामनेत्रे । उं० द० कर्णे० । ऊं० वामकर्णे । ऋं०
द० नासि । ॠं० वामनासि । ऌं० द० गंडे । ॡं०
वामगंडे । एं० ऊर्ध्वोष्ठे । ऐं० अधरोष्ठे । ओं०

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ऊर्ध्वदंतपंक्तौ । औं० अधोदंतपंक्तौ । अं० शिरसि । अः० मुखे । कं० द० बाहुमूले । खं० द० कूर्परे । गं० दक्षिणमणिबंधे । घं० दक्षांगुलिमूले । ङ० दक्षांगुल्यग्रे । चं० वा० बाहुमूले । छं० वा० कूर्परे । जं० वाममणिबंधे । झं० वामांगुलिमूले । ञं० वामांगुल्यग्रे । टं० दक्षपादमूले । ठं० द० जानुनि । डं० द० गुल्फे । ढं० द० पादांगुलिमूले । णं० द० पादांगुल्यग्रे ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तं॰ वामपादमूले । थं॰ वामजानुनिं । दं॰ वामगुल्फे । धं॰ वामांगुलिमूले । नं॰ वामांगुल्यग्रे । पं॰ द॰ पार्श्वे । फं॰ वामपार्श्वे । बं॰ पृष्ठे । भं॰ नाभौ । मं॰ जठरे । यं॰ हृदि । रं॰ दक्षांसे । लं॰ ककुदि । वं॰ वामांसे । शं॰ हृदयादिद॰ हस्तांतम् । षं॰ हृदयादिवामहस्तांतम् । सं॰ हृद॰ द॰ पादांतम् । हं॰ हृद॰ वामपादान्तम् । ळं जठरे । क्षं नमः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मुखे । प्रणवादिः सर्वत्रेति तत्त्वमुद्रया मातृका-
न्यासं कुर्यात् ॥ अथ दीपप्रतिष्ठा ॥ मूलेना-
चम्य प्राणानायम्य कर्मसाक्षित्वेन दीपंस्था-
पनं कुर्यात् ॥ तत्र दीपाधारयंत्रं त्रिकोणं गंधेन
देवीदक्षिणतो लिखित्वा दीपाधारयंत्राय नमः
इति मंत्रेण संपूज्य तदुपरि दीपं संस्थाप्य
गंधादिना दीपं संपूज्य प्रार्थयेत् । भो दीप देवी-

१ घृतदीपो भवेद्दक्षे तैलदीपस्तु वामतः । सितवर्तियुतो दक्षे रक्तवर्तिस्तु वामके ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रूपस्त्वं कर्मसाक्षी ह्यविघ्नकृत् । यावत्कर्मसमाप्तिः
स्यात्तावत्त्वं सुस्थिरो भव ॥ इति दीपं संप्रार्थ्य
तथैव वामेऽपि तैलदीपं प्रज्वालयेत ॥ अथ
यंत्रपूजा ॥ तत्र स्फटिकहेमताम्राद्यन्यतमपत्रे
पात्रे वा यथाशक्ति गंधाष्टकेन रक्तचंदनेन वा
नवकोष्ठं यंत्रं लिखित्वा प्रथमपंक्तावीशान-
कोणादग्निकोणपर्यंतं गौरीरुद्रौ सरस्वतीविरिंची
लक्ष्मीविष्णू इति क्रमेण स्थाप्य मध्यपंक्तावुत्तरतः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ॐ गौर्या सह रुद्राय नमः	ॐ सरस्वत्या सह विरिंचये नमः	ॐ लक्ष्म्या सह हृषीकेशाय नमः
ॐ ऐं महाकाल्यै नमः	ॐ ह्रीं महालक्ष्म्यै नमः	ॐ क्लीं महासरस्वत्यै नमः
ॐ दशाननायै नमः	ॐ अष्टादशभुजायै० सिंहं महिषं	ॐ अष्टभुजायै नमः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दक्षिणांतं महाकालीमहालक्ष्मीमहासरस्वत्यः
तथा तृतीयपंक्तौ वायुकोणतो निर्ऋतिकोणपर्यंतं
क्रमेण दशाननाष्टादशभुजाऽष्टभुजाः स्थापयेत् ।
अत्र तृतीयपंक्तिमध्यकोष्ठस्थायाः अष्टादश-
भुजायाः दक्षे सिंहं वामे महिषं च स्थापयेत् ॥
ततः पूर्वोक्तप्राणप्रतिष्ठामंत्रेण यंत्रस्य प्राण-
प्रतिष्ठां कृत्वाऽऽवाहनादिषोडशोपचारैः संपूज्य
मूलभूतां तुरीयां महालक्ष्मीं विश्वेश्वरीं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जगद्धात्रीं० इत्यादिभिश्चरित्रत्रयोक्तैः स्तोत्रैः स्तुवीत ॥ अथ पूजाविधिः ॥ अस्य श्रीनवार्णमंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः गायत्र्युष्णिगनुष्टुभश्छंदांसि श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः नंदाशाकंभरीभीमाः शक्तयः रक्तदंतिकादुर्गाभ्रामर्यो बीजानि अग्निवायुसूर्यास्तत्त्वानि श्रीजगदंबाप्रीत्यर्थे न्यासे पूजायां च विनियोगः ॥ ऋष्यादिन्यासान् मूलषडंगन्यासांश्च

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विधाय कलशशंखघंटादि संपूज्य ॥ अपवित्रः
पवित्रो वा सर्वावस्था गतोऽपि वा ॥ यः स्मरेत्
पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः ॥ मूलेनात्मानं
पूजाद्रव्याणि प्रोक्षेत् । यंत्रं संस्पृश्य ॐ आं सोहं
इति त्रिवारोच्चारितमंत्रेण यंत्रस्य प्राणप्रतिष्ठां कृत्वा
ततः त्रिखंडामुद्रया पुष्पमादाय स्वहृदिस्थां
त्रिगुणां देवीं सुषुम्णामार्गेण ब्रह्मरंध्रद्वारा कुसुमे
समागतां विभाव्य तत्र रूपत्रयं बिभ्राणां ध्यायेत् ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

खड्गं चक्र० १ अक्षस्रक्प० २ घंटाशूल० ३ इति तत्पुष्पं यंत्रे संस्थाप्य तत्र मध्यबीजत्रये महालक्ष्म्यादिदेवतात्रयं संस्थितं विभावयेत । तत आवाहनी-स्थापनी-संनिधापिनी-संनिरोधिनी--धेनुयोनिमुद्रामूलेन प्रदर्श्य मूलमुच्चार्य श्रीमहाका० नमः आवाहयामि । एवं मूलेनासनपाद्यार्घ्याचमनीयस्नानमंगलस्नानमधुपर्कपंचामृतपूजां विधाय श्रीसूक्तपुरुषसूक्तादिभिरभिषिच्य मूलेन वस्त्रोपव-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्त्रोत्तरीयकंचुकीयज्ञोपवीतचंदनालंकारहरिद्राकुंकुमकज्जल सिन्दूरपरिमलद्रव्य कङ्कणकण्ठसूत्रादिसौभाग्यालंकारपुष्पाणि मूलेन श्रीमहा० १ नमः अमुकद्रव्यं समर्पयामीति प्रत्युपचारमुच्चार्य मंत्रपुष्पांतपूजां कृत्वा आवरणदेवता आवाह्य संपूजयेत् । अत्र सर्वत्रापि यथाक्रमं प्रागादिदिशो ग्राह्याः । इंद्रादिलोकपालाद्यावाहनविषये तु प्रागादिक्रम एवेति ज्ञेयम् । तत्र यंत्रषट्कोणस्थ-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पूर्वकोणे सरस्वतीब्रह्मभ्यां नमः सरस्वतीब्रह्माणा-
वावाहयामीत्येवं सर्वत्रावाहने वाच्यम् १ एव-
मीशानकोणे गौरीरुद्राभ्यां० २ आग्नेयकोणे
लक्ष्मीहृषीकेशाभ्यां० ३ पश्चिमकोणे अष्टादशभु-
जायै० ४ वायव्यकोणे दशाननायै० ५ नैर्ऋत्यकोणे
अष्टभुजायै० ६ दयाब्धे त्राहि संसारसर्पान्मां शरणा-
गतम् । भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥
अनेन प्रथमावरणार्चनेन भगवती श्रीमहाका० ३

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रीयंताम् ॥ १ ॥ पुनः षट्कोणेषु प्रागादिदिक्षु ॥
ॐ नं नंदजायै नमः १ ॐ रं रक्तदंतिकायै॰
२ ॐ शां शाकंभर्यै॰ ३ ॐ दुं दुर्गायै॰
४ ॐ भीं भीमायै॰ ५ ॐ भ्रां भ्रामर्यै॰
६ दयाब्धे त्राहि संसार॰ ॥ २ ॥ षट्कोणा-
द्बहिराग्नेय्यादिचतुर्भागेषु ॐ जं जयायै॰ १
ॐ विं विजयायै॰ २ ॐ जं जयंत्यै॰ ३
ॐ अं अपराजितायै॰ ४ षट्कोणपार्श्वयो-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दक्षिणभागे ॐ सिंहाय० ५ उत्तरभागे ॐ महिषाय नमः ६ दयाब्धे० तृतीयावरणार्चनम् ॥ अनेन तृ० ॥ ३ ॥ अष्टदलेषु प्रागादिषु ॐ ब्रां ब्राह्म्यै० १ ॐ मां माहेश्वर्यै० २ ॐ कौं कौमार्यै० ३ ॐ वैं वैष्णव्यै० ४ ॐ वां वाराह्यै० ५ ॐ नां नारसिंह्यै० ६ ॐ ऐं ऐंद्र्यै० ७ ॐ चां चामुंडायै० ८ दयाब्धे० चतुर्थावरणार्चनम् ॥ अनेन० ॥ ४ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुनरष्टदलेषु प्रागादिषु ॐ अं असितांग-
भैरवाय० १ ॐ रुं रुरुभैरवाय० २ ॐ
चं चंडभैरवाय० ३ ॐ क्रों क्रोधभैरवाय०
४ ॐ उं उन्मत्तभैरवाय० ५ ॐ कं
कपालभैरवाय० ६ ॐ भीं भीषणभैरवाय०
७ ॐ सं संहारभै० ८ दयाब्धे० पंचमा
वरणार्चनम् ॥ अनेन० ॥ ५ ॥ केसरेषु
प्रागादिक्रमेण ॐ बिष्णुमायायै १ ॐ चेत-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नायै० २ ॐ बुद्धयै० ३ ॐ निद्रायै० ४ ॐ क्षुधायै० ५ ॐ छायायै० ६ ॐ शक्त्यै० ७ ॐ तृष्णायै० ८ ॐ क्षांत्यै० ९ ॐ जात्यै० १० ॐ लज्जायै० ११ ॐ शांत्यै० १२ ॐ श्रद्धायै० १३ ॐ कांत्यै० १४ ॐ लक्ष्म्यै० १५ ॐ धृत्यै० १६ ॐ वृत्त्यै० १७ ॐ स्मृत्यै० १८ ॐ दयायै० १९ ॐ तुष्टयै० २० ॐ पुष्टयै० २१ ॐ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मात्रे० २२ ॐ भ्रांत्यै० २३ ॥ दयाब्धे
त्राहि० षष्ठावरणार्चनम् ॥ अनेन० ॥ ६ ॥
प्रागादिषु लोकपालान् ॐ लं इंद्राय० १ ॐ
रं अग्नये० २ ॐ मं यमाय० ३ ॐ क्षं
निर्ऋतये० ४ ॐ वं वरुणाय० ५ ॐ
यं वायवे० ६ ॐ सं सोमाय ७ ॐ हं रुद्रा-
य० ८ ईशानीप्रागंतराले ॐ आं ब्रह्मणे०
९ वरुणनिर्ऋत्यंतराले ॐ ह्रीं शेषाय०

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF - Delhi

१० दयाब्धे० सप्तमावरणार्चनम् ॥ अनेन० ॥ ७ ॥ पुनस्तेनैव क्रमेण ॐ वं वज्राय० १ ॐ शं शक्त्यै० २ ॐ दं दंडाय० ३ ॐ खं खड्गाय० ४ ॐ पां पाशाय० ५ ॐ अं अंकुशाय० ६ ॐ गं गदायै० ७ ॐ त्रिं त्रिशूलाय० ८ ॐ पं पद्माय० ९ ॐ चं चक्राय० १० दयाब्धे० अष्टमावरणार्चनम् ॥ अनेन० ॥ ८ ॥ भूगृहाद्बहिः प्रागादिदिक्षु ॐ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गं गणपतये० १ ॐ क्षें क्षेत्रपालाय० २ ॐ
बं बटुकाय० ३ ॐ यों योगिनीभ्यो० ॥ ४ ॥
दयाब्धे० नवमावरणार्चनम् ॥ अनेन०
॥ ९ ॥ ॐ आवरणदेवताभ्यो नमः चंदनं०
इत्यादिपंचोपचारपूजा ॥ ततः मूलमुच्चार्य श्री-
महाकाली० ३ धूपं दीपं नैवेद्यं तांबूलं दक्षिणां
फलानि महानीराजनदीपं कर्पूरदीपं नमस्का-
रान् प्रदक्षिणाः मंत्रपुष्पं० ॥ अपराधसहस्राणि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्रियंतेऽहर्निशं मया ॥ दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि ॥ १ ॥ आवाहनं न जानामि न जानामि विसर्जनम् ॥ पूजां चैव न जानामि क्षम्यतां परमेश्वरि ॥ २ ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ॥ यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ॥ ३ ॥ अपराधशतं कृत्वा जगदंबेति चोच्चरेत् । यां गतिं समवाप्नोति न तां ब्रह्मादयः सुराः ॥ ४ ॥ साप-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राधोस्मि शरणं प्राप्तस्त्वा जगदंबिके ॥ इदानी-
मनुकंप्योऽहं यथेच्छसि तथा कुरु ॥ ५ ॥
अज्ञानाद्विस्मृतेर्भ्रांत्या यन्न्यूनमधिकं कृतम् ॥
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥ ६ ॥
कामेश्वरि जगन्मातः सच्चिदानंदविग्रहे ॥ गृ-
हाणार्चामिमां प्रीत्या प्रसीद परमेश्वरि
॥ ७ ॥ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्म-
त्कृतं जपम् ॥ सिद्धिर्भवतु मे देवि त्वत्प्र-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सादात् सुरेश्वरि ॥ ८ ॥ प्रार्थना ॥ गीत-
वाद्यनृत्यछत्रचामरांदोलनदर्पणादिसर्वराजोपचा-
रार्थे अक्षतान्० ॥ नमस्करोमि ॥ अनेन
यथाशक्त्यर्चनेन भगवती श्रीजगदंबा प्रीय-
ताम् ॥ शाक्तेभ्यो नमः सर्वोपचारार्थे गं-
धाक्ष० अथ कुमारीपूजा ॥ यजमानः पूजयेच्च
कन्यानां नवकं शुभम् ॥ द्विवर्षाद्या दशा-
ब्दांताः कुमारीः परिपूजयेत् ॥ १ ॥ अर्थादेक-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हायन्यः अल्पवयस्का वर्ज्याः ॥ ता आसने उपवेश्यावाहयेन्मंत्रेण ॥ मंत्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् ॥ नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहम् ॥ १ ॥ अनेनैव मंत्रेण नवापि आवाहयेत् । अशक्तौ यथाशक्ति एकामपि ॥ अथ नवानां पूजामंत्राः ॥ द्विहायनी कुमारीसंज्ञका, तत्पूजामंत्रः--सर्वस्वरूपे सर्वेशे सर्वशक्तिस्वरूपिणि ॥ पूजां गृहाण कौमारि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जगन्मातर्नमोस्तु ते ॥ २ ॥ त्रिहायनी त्रि-
मूर्तिः, तन्मंत्रः-- त्रिपुरां त्रिपुराधारां त्रिवर्षां
ज्ञानरूपिणीम् ॥ त्रैलोक्यवंदितां देवीं त्रिमूर्तिं
पूजयाम्यहम् ॥ ३ ॥ चतुर्वर्षा कल्याणी,
तत्पूजामंत्रः-- कलात्मिकां कलातीतां कारुण्य-
हृदयां शिवाम् ॥ कल्याणजननीं देवीं क-
ल्याणीं पूजयाम्यहम् ॥ ४ ॥ पंचवर्षा रो-
हिणी, तत्पूजामंत्रः-- अणिमादिगुणाधारामका-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राद्यक्षरात्मिकाम् ॥ अनंतशक्तिकां लक्ष्मीं रोहिणीं
पूजयाम्यहम् ॥५॥ षड्वर्षा कालिका, तत्पूजामंत्रः-
कामचारां शुभां कांतां कालचक्रस्वरूपिणीम् । का-
मदां करुणोदारां कालिकां पूजयाम्यहम् ॥६॥ सप्त-
वर्षा चंडिका, तत्पूजामंत्रः- चंडवीरां चंडमायां चं-
डमुंडप्रभंजनीम् । पूजयामि सदा देवीं चंडिकां
चंडविक्रमाम् ॥ ७ ॥ अष्टवर्षा शांभवी, तत्पूजा-
मंत्रः-सदानंदकरीं शांतां सर्वदेवनमस्कृताम् । सर्व-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भूतात्मिकां लक्ष्मीं शांभवीं पूजयाम्यहम् ॥ ८ ॥ नवहायनी दुर्गा, तत्पूजामंत्रः- दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनीम् । पूजयामि सदा भक्त्या दुर्गां दुर्गार्तिनाशिनीम् ॥ ९ ॥ दशवर्षा सुभद्रा, तत्पूजामंत्रः- सुंदरीं स्वर्णवर्णाभां सुख-सौभाग्यदायिनीम् । सुभद्रजननीं देवीं सुभद्रां पूजयाम्यहम् ॥ १० ॥ इति प्रत्येकं मंत्रांते तत्त-न्नाममंत्रेण नवापि षोडशोपचारैः पंचापचारैर्वा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

पूजयेदिति ॥ अथ बलिदानम् ॥ मूलमंत्रांते श्रीमहालक्ष्म्यै नमः पायसबलिं समर्पयामि इति महाकाल्यादियोगिन्यंतयंत्रस्थावरणदेवताभ्यः प्रत्येकं सर्वाभ्यो बलीन् दद्यात् ॥ अथ कूष्मांडबलिः ॥ आचम्य प्राणानायम्य देशकालाद्युच्चार्य मम सकुटुंबस्य सर्वारिष्टशांतिसर्वाभीष्टसिद्धिकल्पोक्तफलावाप्तिद्वारा श्रीमहाकाली० ३ देवताप्रीत्यर्थं कूष्मांडबलिदानं करिष्ये ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MtDF- Delhi

तदंगत्वेन पंचोपचारैः पूजनं बलिपूजनं च करिष्ये । मूलमंत्रेण मुख्यदेवतां पंचोपचारैः संपूज्य तत्पुरतः स्वयमुदङ्मुखो बलिं प्राङ्मुखं पीठे वस्त्रगुंठितं कूष्मांडं निधाय ॐ कूष्मांडबलये नम इति आवाहनवस्त्रगंधादिभिः संपूज्याभिमंत्रयेत् ॥ पशुस्त्वं बलिरूपेण मम भाग्यादवस्थितः । प्रणमामि ततः सर्वरूपिणं बलिरूपिणम् ॥ १ ॥ चंडिकाप्रीतिदानेन

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दातुरापद्विनाशनम् । चामुंडाबलिरूपाय बले तुभ्यं
नमोऽस्तु ते ॥ २ ॥ यज्ञार्थं बलयः सृष्टाः स्वय-
मेव स्वयंभुवा । अतस्त्वां घातयाम्यद्य यस्मा-
द्यज्ञे वधोऽवधः ॥ ३ ॥ ततः शस्त्रं गंधादिना संपू-
ज्याभिमंत्रयेत् । ऐं ह्रीं श्रीं रसना त्वं चंडिकायाः
सुरलोकप्रसाधकः । इति ह्रां ह्रीं खड्ग आं हुं फट्
इति हस्ते शस्त्रं गृहीत्वा ॐ कालवज्रेश्वरि
लोहदंडायै नमः इति पठन् कूष्माण्डं छि-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्त्वा छेदनावसरे तं न विलोकयेत् । कौशिकी रुधिरेणाप्यायतामिति देव्यै तदर्धं निवेद्य अवशिष्टार्धस्य पंचभागान् कृत्वा पूतनायै बलिभागं निवेदयामि चरक्यै बलि० विदार्यै बलि० पापराक्षस्यै बलि० ततो माषपिष्टपशुं शत्रुं शस्त्रेण छित्त्वा स्कंदाय पश्वर्धं समर्पयामि विशिखाय पश्वर्धं० इति समर्प्य शेषं रक्षोभ्यो हरेत् । मंत्रास्तु ॐ ह्रीं स्फुर स्फुर ॐ फ्रीं ॐ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हुंफट् मर्द मर्द हुं इति तच्छेषं बहिर्दद्यात् । बलिं
गृह्णंत्विमे देवा आदित्या वसवस्तथा । मरुत-
श्चाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः ॥ असुरा
यातुधानाश्च पिशाचोरगराक्षसाः । डाकिन्यो
यक्षवेताला योगिन्यः पूतनाः शिवाः ॥ जृंभकाः
सिद्धगंधर्वाः साध्या विद्याधरा नगाः ।
दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः ॥
जगतां शांतिकर्तारो ब्रह्माद्याश्च महर्षयः ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा विघ्नं मा च मे पापं मा संतु परिपंथिनः । सौम्या भवंतु तृप्तास्ते भूतप्रेताः सुखावहाः । भूतानि यानीह वसंति तानि बलिं गृहीत्वा विधिवत्प्रयुक्तम् ॥ अन्यत्र वासं परिकल्पयंतु रक्षंतु मां तानि सदैव चात्र । इति । ततः स्नात्वा कृतातिलको देवीं प्रार्थयेत् । खड्गिनी शू० शूलेन पाहि० ॥ ४ ॥ सर्वस्वरूपे० ॥ ५ ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि । पुत्रान् देहि धनं देहि स-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वान्कामांश्च देहि मे ॥ महिषघ्नि महामाये चामुं-
डे मुंडमालिनि । आयुरोग्यमैश्वर्यं देहि दे-
वि नमोस्तु ते ॥ इति प्रार्थयेत् । एतद्बलिदानं
होमांगं तच्च होमोत्तरमेव ॥ पूजांगं वैकल्किं
तत्र च पायसबलिदानमवश्यमेवेति बलिदा-
नविधिः ॥ अथ पुस्तकपूजनं ॥ मूलमंत्रेणार्च-
म्य प्राणानायम्य ॥ ॐनमः पिशाचिनि करंकि-
नि त्रिशूलखड्गहस्ते सिंहारूढे एह्येहि आगच्छ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आगच्छ इमां पूजां गृह्ण गृह्ण स्वाहा । सप्तशती-
रूपिण्यै सरस्वत्यै नमः इति मंत्रेणावाह्य ॐ
ह्रीं चंडिकायै नम इति मंत्रेण षोडशोपचारैः पू-
जयेत् ॥ ॥ अथ शापोद्धारोत्कीलनमंत्रौ—ॐ
ह्रीं क्लीं श्रीं क्रां क्रीं चंडिके देवि शापानुग्रहं
कुरु कुरु स्वाहा । इति सप्तवारं शापोद्धारमंत्रं ज-
पित्वा ॐ श्रीं क्लीं ह्रीं सप्तशति चण्डिके उत्कील-
नं कुरु कुरु इत्येकविंशतिवारमुत्कीलनमंत्रं ज-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हृदये । ॐ नंदाशाकंभरीभीमाशक्तिभ्यो नमः दक्षिणस्तने । ॐ रक्तदंतिकादुर्गाभ्रामरीबीजेभ्यो नमः वामस्तने । ॐ अग्निवायुसूर्यतत्त्वेभ्यो नमः नाभौ इति । मूलेन करौ संशोध्य ॥ अथ एकादशन्यासाः ॥ तत्रादौ पूर्वोक्तं (७–८ पत्रोक्तं) प्राथमिकं देवसारूप्यप्रदं मातृकान्यासं कृत्वा ॥ १ ॥ द्वितीयं सारस्वताभिधं कुर्यात् । स यथा–प्रणवोच्चारः सर्वत्रा-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दौ । ॐ ऐं ह्रीं क्लीं नमः कनिष्ठिकयोः ॥ ऐं ह्रीं क्लीं नमः अनामिकयोः । ऐं० मध्यमयोः ऐं० तर्जन्योः । ऐं० अंगुष्ठयोः । ऐं० करमध्ये । ऐं० करपृष्ठे । ऐं० मणिबंधयोः । ऐं० कूर्परयोः ॥ ऐं ह्रीं क्लीं नमः हृदयाय नमः इत्याद्यस्त्राय फडित्यंतं षडंगन्यासं कुर्यादिति सारस्वताभिधो जाडयविनाशको द्वितीयः ॥ २ ॥ ॐ ह्रीं ब्राह्मी पूर्वस्यां मां पातु । ह्रीं माहेश्वरी आग्नेय्यां मां पातु ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ह्रीं कौमारी दक्षिणस्यां मां पातु । ह्रीं वैष्णवी नैर्ऋत्यां मां पातु । ह्रीं वाराही पश्चिमायां मां पातु । ह्रीं इंद्राणी वायव्यां मां पातु । ह्रीं चामुंडा उत्तरस्यां मां पातु । ह्रीं महालक्ष्मीरैशान्यां मां पातु । ह्रीं व्योमेश्वरी ऊर्ध्वं मां पातु । ह्रीं सप्तद्वीपेश्वरी भूमौ मां पातु । ह्रीं कामेश्वरी पाताले मा पातु ॥ इति त्रैलोक्यविजयप्रदो मातृगणन्यासस्तृतीयः ॥ ३ ॥ कमलांकुशमंडिता नंदजा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पूर्वांगं मे पातु । खड्गपात्रधरा रक्तदंतिका दक्षिणांगं मे पातु । पुष्पपल्लवसंयुता शाकंभरी पश्चिमांगं मे पातु । धनुर्बाणकरा दुर्गा वामांगं मे पातु । शिरःपात्रकरा भीमा मस्तकाच्चरणावधि मां पातु । चित्रकांतिभृद्भ्रामरी पादादि मस्तकांतं मे पातु । इति नंदजादि न्यासो जरामृत्युहरश्चतुर्थः ॥ ४ ॥ पादादिनाभिपर्यंतं ब्रह्मा मां पातु । नाभेर्विशुद्धिपर्यंतं जनार्दनो मां पातु ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विशुद्धेर्ब्रह्मरध्रांतं रुद्रो मां पातु । हंसो मे पदद्व-
यं पातु । वैनतेयः करद्वयं मे पातु । वृषभः
चक्षुषी मे पातु । गजाननः सर्वांगं मे पातु । आनं-
दमयो हरिः परापरौ देहभागौ मे पातु ॥ इति स-
र्वकामप्रदो ब्रह्मादिन्यासः पञ्चमः ॥ ९ ॥ अष्टा-
दशभुजा महालक्ष्मीर्मध्यभागं मे पातु । अष्ट-
भुजा महासरस्वती ऊर्ध्वभागं मे पातु । दशभु-
जा महाकाली अधोभागं मे पातु । सिंहो हस्तद्व-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यं मे पातु । हंसोऽक्षियुगं मे पातु । महिषारूढो यमः पदद्वयं मे पातु । महेशश्चंडिकायुक्तः सर्वांगं मे पातु ॥ इति सद्गतिप्रदो महालक्ष्म्यादिन्यासः षष्ठः ॥ ६ ॥ ऐं नमः ब्रह्मरंध्रे । ह्रीं० दक्षनेत्रे । क्लीं० वामनेत्रे । चां० दक्षकर्णे । मुं० वामकर्णे । डां० दक्षनासापुटे । यैं० वामनासा० । विं० मुखे । च्चें० गुह्ये ॥ इति मूलाक्षरादिन्यासो रोगक्षयकरः सप्तमः ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF - Delhi

॥ ७ ॥ ह्रें नमो गुह्ये । विं नमो मुखे । यैं० वाम-
नासापुटे । डां० दक्षनासापुटे । मुं० वामकर्णे ।
चां० दक्षकर्णे । क्लीं० वामनेत्रे । हीं० दक्षनेत्रे ।
ऐं० ब्रह्मरंध्रे ॥ इति विलोमाक्षरन्यासः स-
र्वदुःखनाशकोऽष्टमः ॥ ८ ॥ मुलमुच्चार्य मस्त-
काच्चरणांतं चरणान्मस्तकांतं व्यापकमष्टवा-
रं कुर्यात् ॥ यथा–प्रथमं पुरतो मूलेन मस्त-
काच्चरणावधि ॥ १ ॥ ततश्चरणान्मस्तकाव

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धिमूलोच्चारेण व्यापकम् ॥ २ ॥ एवं दक्षिणतः पश्चाद्वामभागे चेति प्रतिदिग्भागेऽनुलोमविलोमयता द्विर्द्विरिति अष्टवारं व्यापकं भवति ॥ इति देवताप्राप्तिकरो मूलव्यापकन्यासो नवमः ॥ ९ ॥ ॐ ऐं ह्रीं क्लीं हृदयाय नमः । एवं प्रत्येकमंगं मूलमुच्चार्य षडंगेषु न्यसेदिति त्रैलोक्यवशकरो मूलषडंगन्यासो दशमः ॥ १० ॥

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

शंखिनी चापिनी बाणभुशुंडीपरिघायुधा ॥ १ ॥
सौम्या सौम्यतरा शेषसौम्येभ्यस्त्वतिसुंदरी
॥ परापराणां परमा त्वमेव परमेश्वरी ॥ २ ॥ यच्च
किंचित्क्वचिद्वस्तु सदसद्वाखिलात्मिके ॥ तस्य
सर्वस्य या शक्तिः सा त्वं किं स्तूयसे मया
॥ ३ ॥ यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो
जगत् ॥ सोपि निद्रावशं नीतः कस्त्वां स्तोतुमि-
हेश्वरः ॥ ४ ॥ विष्णुः शरीरग्रहणमहमीशान

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एव च ॥ कारितास्ते यतोऽतस्त्वा कः स्तोतुं शक्तिमान् भवेत् ॥ ९ ॥ आद्यं वाग्बीजं कृष्णतरं ध्यात्वा सर्वांगे विन्यसामि ॥ इति सर्वांगे न्यसेत् ॥ शूलेन पाहि नो देवि पाहि खड्गेन चांबिके ॥ घंटास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥ १ ॥ प्राच्यां रक्ष प्रतीच्यां च चंडिके रक्ष दक्षिणे ॥ भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥ २ ॥ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरंति ते ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यानि चात्यंतघोराणि तै रक्षास्मांस्तथा भुवम् ॥ ३ ॥ खड्गशूलगदादीनि यानि चास्त्राणि तेंबिके ॥ करपल्लवसंगीनि तैरस्मान्त्रक्ष सर्वतः ॥ ४ ॥ इति द्वितीयं मायाबीजं सूर्यसदृशं ध्यात्वा सर्वांगे विन्यसेत् ॥ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ॥ भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तु ते ॥ १ ॥ एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् ॥ पातु नः सर्वभूतेभ्यः कात्यायनि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi .

नेत्रे । ॐ क्लीं० वामनेत्रे । ॐ चां नमः दक्ष-
कर्णे । ॐ मुं नमः वामकर्णे । ॐ डां नमः दक्षना-
सापुटे । ॐ यैं नमः वामनासापुटे । ॐ विं नमः
मुखे । ॐ चें नमः गुह्ये ॥ समस्तमंत्रमुच्चार्या-
ष्टवारं व्यापकं पूर्ववच्चरेत् ॥ ॐ ऐं प्राच्यै नमः ॥
ॐ ऐं आग्नेयै नमः ॥ ॐ ह्रीं दक्षिणायै नमः ॥ ॐ
ह्रीं नैर्ऋत्यै नमः ॥ ॐ क्लीं प्रतीच्यै नमः ॥ ॐ क्लीं
वायव्यै नमः ॥ ॐ चामुंडायै उदीच्यैनमः ॥

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ॐ विच्चे ईशान्यै नमः ॥ ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे ऊर्ध्वायै नमः ॥ ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे भूम्यै नमः ॥ अथ देवीध्यानं ॥ खड्गं चक्र-गदेषुचापपरिघाञ्छूलं भुशुंडीं शिरः शंखं सं-दधतीं करैस्त्रिनयनां सर्वांगभूषावृताम् । नी-लाश्मद्युतिमास्यपाददशकां सेवे महाकालि-कां यामस्तौत्स्वपिते हरौ कमलजो हंतुं मधुं कै-टभम् ॥ १ ॥ अक्षस्रक्परशूगदेषुकुलिशं पद्मं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi.

धंनुः कुंडिकां दण्डं शक्तिमसिं च चर्म जलजं घंटां सुराभाजनम् ॥ शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥ २ ॥ घंटाशूलहलानि शंखमुसले चक्रं धनुः सायकं हस्ताब्जैर्दधतीं घनांतविलसच्छीतांशुतुल्यप्रभाम् ॥ गौरीदेहसमुद्भवां त्रिनयनामाधारभूतां महापूर्वामत्र सरस्वतीमनुभजे शुंभादिदै-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्यार्दिनीम् ॥ ३ ॥ एवं देवीं ध्यात्वा मानसो-
पचारैः संपूज्य माला प्रार्थयेत् ॥ ॐ महा-
माले महामाये सर्वशक्तिस्वरूपिणि । चतुर्व-
र्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥ इति
मंत्रेण मालां प्रार्थ्य ॐ सिद्धये नम इति मालां
नत्वा जपेत् (मंत्रार्थः ॥ महासरस्वत्यादि-
रूपे चित्सदानंदमये चंडिके त्वां ब्रह्मविद्याप्रा-
प्त्यर्थं वयं सर्वदा ध्यायामः) इति मंत्रार्थानु-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संधानपूर्वकमष्टोत्तरशतं १०८ सहस्रं वा नवार्णमंत्रं जपेत् ॥ जपांते गुह्येत्यादिना जपं समाप्य सप्तशतीं पठेत् ॥ ततो रात्रिसूक्तं पठेत् ॥ तत्रादौ ऋग्वेदोक्तं रात्रिसूक्तं यथा--रात्रीव्यख्यदिति सूक्तस्य कुशिक ऋषिः रात्रिर्देवता गायत्री छंदः श्रीजगदंबाप्रीत्यर्थे जपे विनियोगः ॥ ॐ रात्रीव्यंख्यदायतीपुरुत्रादेव्यं १ क्षभिः ॥ विश्वाअधिश्रियोधित ॥ ओर्वप्राअ

Jagannath Bhattarai Collection- Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मर्त्यानिवतोदेव्युद्धतः ॥ ज्योतिषाबाधतेत
मः ॥ निरुस्वसारमस्कृतोषसं देव्यायती ॥
अपेदुहासतेतमः ॥ सानोअद्ययस्यावयंनिते
यामंनविक्ष्महि ॥ वृक्षेनवंसतिंवयः ॥ निग्रामा
सोअविक्षतनिपद्वंतोनिपक्षिणः ॥ निश्येना
सश्चिदर्थिनः । यावयावृक्यं १ वृकंयवयस्तेनमू
र्म्ये ॥ अथानःसुतरांभव ॥ उपमापेपिशत्तमः कृ
ष्णंव्यक्तमास्थित ॥ उषऋणेवयातया ॥ उपते

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गाइवाकंरंवृणीष्वदुंहितर्दिवः ॥ रात्रिस्तोमंन जिग्युषे ॥ १ ॥ इति ऋग्वेदोक्तं रात्रिसूक्तम् ॥ अथ तंत्रोक्तं रात्रिसूक्तम्--विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ॥ निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ॥ १ ॥ ब्रह्मोवाच ॥ त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ॥ सुधा त्वमक्षरे नित्या त्रिधा मात्रात्मिका स्थिता ॥ २ ॥ अर्धमात्रा स्थिता नित्या यामुच्चार्या

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विशेषतः ॥ त्वमेव संध्या सावित्री त्वं देवि जननी
परा ॥ ३ ॥ त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते
जगत् ॥ त्वयैतत्पाल्यते देवि त्वमत्स्यंते च
सर्वदा ॥ ४ ॥ विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा
च पालने ॥ तथा संहृतिरूपांते जगतोऽस्य
जगन्मये ॥ ५ ॥ महाविद्या महामाया महामे-
धा महास्मृतिः ॥ महामोहा च भवती महादेवी
महेश्वरी ॥ ६ ॥ प्रकृतिस्त्वं च सर्वस्य गुणत्रय-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विभाविनी ॥ कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥ ७ ॥ त्वं श्रीस्त्वमीश्वरीस्त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ॥ लज्जापुष्टिस्तथा तुष्टिस्त्वं शांतिः क्षांतिरेव च ॥ ८ ॥ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥ शंखिनी चापिनी बाणाभुशुंडीपरिघायुधा ॥ ९ ॥ सौम्या सौम्यतरा शेषसौम्येभ्यस्त्वतिसुंदरी ॥ परापराणां परमा त्वमेव परमेश्वरी ॥ १० ॥ यच्च किंचित्

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ॐ शं० हः भ्रामर्यै करतलकरपृष्ठाभ्यां नमः ।
अस्त्राय फट् ॥ एवं हृदयादिषडंगन्यासः ॥
अथागन्यासः ॥ ॐ वाराह्यै नमः पादयोः ।
नारसिंह्यै न० नितंबे । चामुंडायै० नाभौ । माहेंद्र्यै०
कंठे । ब्राह्मयै० पृष्ठे । वैष्णव्यै० दक्षिणभुजे ।
माहेश्वर्यै० वामभुजे । कौमार्यै० स्कंधयोः ।
कात्यायन्यै० मुखे । शिवदूत्यै० शिरसि ।
शिवायै० हृदि । काल्यै० दक्षिणकुक्षौ ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रक्तदंतिकायै० वामकुक्षौ । शताक्ष्यै० पृष्ठवंशे । शाकंभर्यै० भ्रुवोः । प्रणवादिः सर्वत्रेति । ॐ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा । शंखिनी चापिनी बाणभुशुंडीपरिघायुधा शिरसि ॥ ॐ शूलेन पाहि नो देवि पाहि खड्गन चांबिके । घंटास्वनेन नः पाहि चापज्यानिःस्वनेन च मुखे ॥ ॐ प्राच्या रक्ष प्रतीच्यां च चंडिके रक्ष दक्षिणे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepa

CC-0. Digitized by eGangotri and MIDF- Delhi

भ्रामणेनात्मशूलस्य उत्तरस्या तथेश्वरि कंठे ॥ ॐ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरंति ते। यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम् बाह्वोः ॥ ॐ खड्गशूलगदादीनि यानि चास्त्राणि तेंऽबिके । करपल्लवसंगीनि तैरस्मान्रक्ष सर्वतः हृदये ॥ ॐ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते । भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते उदरे ॥ ॐ एतत्ते वदनं सौम्य

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लोचनत्रयभूषितम् । पातु नः सर्वभूतेभ्यः कात्यायनि नमोऽस्तु ते नाभौ ॥ ॐ ज्वाला-करालमत्युग्रमशेषासुरसूदनम् । त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते ऊर्वोः ॥ ॐ हि-नस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् । सा घंटा पातु नो देवि पापेभ्यो नः सुतानिव जान्वोः ॥ ॐ असुरासृग्वसापंकचर्चितस्ते करोज्ज्वलः । शुभाय खड्गो भवतु चंडिके त्वां

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्मत्कृतं जपम् ॥ सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरीति मंत्रेण देव्या दक्षिणकरे जपं समर्प्य यथासुखं विहरेदिति ॥ श्रीजगदंबा प्रसन्ना भवतु ।

इदं पुस्तकं हरिप्रसादात्मजेन व्रजवल्लभशर्मणा
" मुंबईवैभव " मुद्रणयंत्रे मुद्रापितम् ।
शके १८४१ संवत् १९७६

इदं पुस्तकं सन १८६७ मितस्य २५ नियमानुसारेण राजलेखारूढं
कृत्वाऽस्य सर्वेऽधिकाराः स्वायत्तीकृताः सन्ति ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ इति दुर्गासप्तशती समाप्ता ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi